यत्रोधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामति वर्त्तितुं वा । निरुत्सुकानामभि योगभाजां समुत्सुके वाङ्कमुपैति सिद्धिः ।

अत्र प्रत्ययस्य ॥ सुखमीहितुं वेति युक्तः पाठः ॥

ते हिमालयमामन्त्र्य पुनःप्रेक्ष्य च शूलिनं । सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥

अत्र सर्वनाम्नः ॥ अनेन विसृष्टा इतितु वाच्यम् ॥

महीभृतः पुत्रवतोपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं । अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ॥

अत्र पर्य्यायस्य महीभृतोऽपत्यवतोऽपीतियुक्तं॥ अत्र सत्यपि पुत्रे कन्यारूपेऽपत्ये स्नेहोऽभूदिति केचित्समर्थयन्ते ॥

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः। नियता लघुता निरायतेरगरीयान्नपदं नृपश्रियः ॥

अत्रोपसर्गस्य पर्य्यायस्य च ॥ तदभिभवः कुरुते ॥ निरायति लघुतां भजते निरायतिः लघुतावान्न पदं नृपश्रियः ॥

काचित्कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मीर श्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्त सत्त्वाः । भ्रेमु

वात्या इवान्याः प्रति पदमपरा भूमिवत्कम्पमानाः प्रस्थाने पार्थिवानामशिवमिति पुरोभाविनार्य्यः शशंसुः ॥

अत्र वचनस्य काश्चित्कीर्णा रजोभिर्दिवमनु विदधुर्मन्दवक्रेन्दुशोभा निःश्रीकाइति कम्पमाना इत्यत्र कम्पमापुरिति पठनीयम् ॥

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं छाया बद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु । विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले विश्रान्तिं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥

अत्र कारकस्य । विश्रब्धा रचयन्तु शूकरवरा इत्यदुष्टं ॥

अकलिततपस्तेजोवीर्य्यप्रथिम्नि यशोनिधाववितथमदाध्माते रोषान्मुनावभिधावति । अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे स्फुरति रभसात्पाणिः पादोपसंग्रहणाय च ॥

अत्र क्रमस्य ॥ पादोपसंग्रहणायेति पूर्वं वाच्यं एवमन्यत्राप्यनुसर्त्तव्यं ॥ अविद्यमानः क्रमो यत्र यथा ॥

द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः । कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

अत्र त्वंशब्दानन्तरमेकारो युक्तः ॥ यथा वा ॥

शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ दोषाकरश्रीर्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टिनीखड्गयष्टिः। आज्ञेयं सर्वगा ते विलसति च पुनः किं मया वृद्धयाते प्रोच्यैवेत्थं प्रकोपाच्छशिकरसितया यस्य कीर्त्या प्रयातं ॥

अत्र इत्थं प्रोच्येवेति न्याय्यम् ॥ तथा ॥ लग्नं रागावृताङ्ग्येत्यादौ इति श्रीनियोगादिति वाच्यम्। अमतः प्रकृतविरुद्धःपरार्थो यत्र ॥ यथा ॥

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी। गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥

अत्र प्रकृते रसे विरुद्धशृङ्गारस्य व्यञ्जकोऽपरोर्थः ॥ अर्थदोषानाह ॥ अर्थोदुष्टः कष्टोव्याहतपुनरुक्तः दुःक्रमग्राम्यः सन्दिग्धोनिर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ॥ अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्तः साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ॥ विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः ॥ दुष्टइति सम्बध्यते ॥ क्रमेणोदाहरणं ॥

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः। मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति ॥

अत्र अतिविततत्वादयोनुपादानेपि प्रतिपाद्य मानमर्थं न वाधन्त इत्यपुष्टाः नत्वसङ्गताः पुनरुक्ता वा ॥

सदा मध्ये यासामियममृतनिष्यन्दसरसा सरस्वत्युद्दामा वहति वक्रमार्गा परिमलं। प्रसादात्ता एताघनपरिचिताः केनमहतां महाकाव्यव्योम्नि स्फुरितमधुरायान्तु रुचयः॥

अत्र यासाङ्कविरुचीनां मध्ये सुकुमारविचित्रमध्यमात्मकत्रिमार्गा भारती चमत्कारं वहति ताः गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत्प्रसन्ना भवन्तु॥ यासामादित्य प्रभाणां मध्ये त्रिपथगा वहति ता मेघपरिचिताः कथं प्रसन्ना भवन्तीति सङ्क्षेपार्थः॥

जगति जयिनस्तेते भावा नवेन्दुकलादयः प्रकृति मधुराः सन्त्येवान्ये मनोमदयन्ति ये। ममतु यदियं याता लोके विलोचनचन्द्रिकानयनविषयं जन्मन्येकः सएव महोत्सवः॥

अत्रेन्दुकलादयोयं प्रत्यप्रशस्यप्रायाः सएव चन्द्रिकात्वमुत्कर्षार्थमारोपयतीति व्याहतत्वंकृतमनुमतमित्यादि॥

अत्रार्जुनार्जुनेति भवद्भिरिति चोक्ते सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः॥ यथा वा॥

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे सेना नाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्व्वधन्वीश्वराणां। कर्णालं सम्भ्रमेण व्रज कृप समरं मुञ्च हार्दिक्यशङ्कां ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः॥

अत्र चतुर्थपाद वाक्यार्थः पुनरुक्तः॥

भूपालरत्ननिर्दैन्यप्रदानप्रशस्तोत्सव । विश्राणय तुरङ्गं मे मातङ्गं वा मदालसं॥

अत्र मातङ्गस्य प्राङ्निर्द्देशोयुक्तः॥

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते। तदपि साम्प्रतमाहर कूर्परं त्वरितमूरुमुदञ्चयकुञ्चितं॥

एषोऽविदग्धः॥

मात्सर्य्यमुत्सार्य्येत्यादि॥

अत्र प्रकरणाद्यभावे सन्देहः॥ शान्तशृङ्गार्य्यन्यतराभिधाने तु निश्चयः॥

गृहीतं येनासीः परिभवभयान्नोञ्झितमपि प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः। परित्यक्तं तेन त्वमसि सुतशोकान्नतु भयाद्विमोक्ष्ये शस्त्रत्वामहमपि ततः स्वस्ति भवते॥

अत्र शस्त्रमोचने हेतुर्नोपात्तः॥

इदन्ते केनोक्तं कथय कमलातङ्कवदने यदेतस्मिन्हेम्नः कटकमिति धत्से खलु धियं ॥ इदं तद्दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा तव प्रीत्या चक्रं करकमलमूले विनिहितं ॥

अत्र कामस्य चक्रं लोकेऽप्रसिद्धं ॥

उपपरिसरं गोदावर्य्याःपरित्यजताध्वगाः सरणिमपरो मार्गस्तावद्भवद्भिरिहेक्ष्यतां । इह हि विहितोरक्ताशोकः कया पि हताशया चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥

पादाघातेनाशोकस्य पुष्पोद्गमःकविषुप्रसिद्धो नपुनरङ्कुरोद्गमः ॥

सुसितवसनालंकारायां कदाचन कौमुदी महसि सुदृशि स्वैरंयान्त्यांगतोस्तमभूद्विधुः । तदनु भवतः कीर्त्तिः केनाप्य गीयत येन साप्रियगृहमगान्मुक्ताशङ्का क नासि शुभप्रदः ॥

अत्रामूर्त्तापि कीर्त्तिः ज्योत्स्नावत्प्रकाशरूपा कथितेति लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टं ॥

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः । नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥

ग्रहोपरागं विना रात्रौ स्नानंधर्म्मशास्त्रेण विरुद्धं ॥

अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते । षाड्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना ॥

एतदर्थशास्त्रेण ॥

विधाय दूरे केयूरमनङ्गाङ्गणमङ्गना । बभार कान्तेन कृतां करजोल्लेखमालिकां ॥

अत्र केयूरपदे नखक्षतं न निहितमित्येतत्काममशास्त्रेण ॥

अष्टाङ्गयोगपरिशीलनकीलनेन दुःसाधसिद्धिसविधं विदधद्विदूरे । आसादयन्नभिमतामधुना विवेकख्यातिं समाधिधनमौलिमणिर्विमुक्तः ॥

अत्र विवेकख्यातिस्ततःसंप्रज्ञातसमाधिः पश्चादसंप्रज्ञातस्ततोमुक्तिर्नतु विवेकख्यातौ ॥ एवं विद्यान्तरैरपि विरुद्धमुदाहार्य्यं ॥

प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं । सन्तर्पिताः प्रणयिनोविभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किं ॥

अत्र ततः किमिति न नवीकृतं । तत्तु यथा ॥

यदि दहत्यनलोत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः । लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ॥ यत्रानुल्लिखिताक्षमेव निखिलं निर्माणमेतद्विधेरुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा । याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्संपदस्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितं ॥

अत्र छायामात्रमणीकृताश्मसु मणेस्ताश्मतैवोचितेति सनियमत्वं वाच्यं ॥

वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते बाहुः काकुत्स्थवीर्य्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः । वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं स्वच्छेऽन्तर्मानसेऽस्मिन् कथमवनिपते तेऽम्बुपानाभिलाषः ॥

अत्र शोण एवेति नियमेन वाच्यः ॥

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकैर्मन्त्रं तन्त्र मथप्रयुज्य हरत श्वेतोत्पलानां श्रियं । चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके येन द्रष्टुमहं क्षमे दशदिशस्तद्वक्त्रमुद्राङ्किताः ॥

अत्र ज्योत्स्नामिति श्यामाविशेषो वाच्यः ॥

कल्लोलवेल्लितदृषत्परुषप्रहारैरत्नान्यमूनि मकरालय मावमंस्थाः । किं कौस्तुभेन विहितो भवतो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोपि ॥

अत्र एकेन किं न विहितो भवतः स नामेति सामान्यं वाच्यं ॥

अर्थित्वे प्रकटीकृतेपि न फलप्राप्तिः प्रभोः प्रत्युत द्रुह्यन्दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया । उत्कर्षञ्च परस्मान

यशसोर्विध्वंसनं चात्मनः स्त्रीरत्नञ्च जगत्पतिर्दशमुखोदेवः कथं मृष्यते॥

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षति। नहि परस्येत्यनेन सम्बन्धोयोग्यः॥

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी। उत्पत्तिर्द्रुहिणान्वये च तदहो तादृग्वरोलभ्यते स्याच्चेदेष न रावणः क्वनु पुनः सर्व्वत्र सर्वे गुणाः॥

अत्र स्याच्चेदेष न रावणइत्यन्त एव समाप्यं॥

श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा। निशा शशाङ्केन धृतिः समाधिना नयेन चालंक्रियते नरेन्द्रता॥

अत्र श्रुतादिभिरुत्कृष्टैः सहचरितैर्व्यसनमूर्खतयोर्निकृष्टयोर्भिन्नत्वं लग्नं रागावृताङ्गीत्यत्रवि दितं तेस्त्वित्यनेन श्रीस्तस्मादपसरतीति विरुद्धं प्रकाश्यते॥

प्रयत्नपरिबोधितःस्तुतिभिरद्य शेषे निशामकेशवमपाण्डवं भुवनमद्य निःसोमकं। इयं परिसमाप्यते रणकथाद्य दोःशालिनामपैतु रिपुकाननातिगुरुरद्य भारोभुवः॥

अत्र शयितः प्रयत्नेन बोध्यसे इति विधेयं॥ यथा वा॥

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः तेपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकैर्दम्भस्य स्फुरितं विदन्नपि जनोजाल्मोगुणानीहते ॥

अत्र वाताहारादित्रयं व्युत्क्रमेणवाच्यं ॥

अरे रामाहस्ताभरणभसलश्रेणिशरणस्मरक्रीडाव्रीडाशमनविरहिप्राणदमन । सरोहंसोत्तंसप्रचलदलनीलोत्पलसखे सखेदोहं मोहं श्लथय कथय क्वेन्दुवदना ॥

अत्र विरहिप्राणदमनेति नानुवाद्यं ॥ लग्नं रागावृताङ्ग्येत्याद्यत्र वदितुं तेस्त्वित्युपसंहृतोपिते नेत्यादिना पुनरुपात्तः ॥

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः । यथास्य जायते पातोन तथा पुनरुन्नतिः ॥

अत्र पुंव्यञ्जनस्यापि प्रतीतिः यत्रैकोदोषः प्रदर्शितस्तत्र दोषान्तराण्यपि सन्ति तथापि तेषां तत्राप्रकृतत्वात्प्रकाशनं न कृतं ॥ कर्णावतंसादि पदे कर्णादिध्वनिनिर्म्मितिः सन्निधानादिबोधार्थं ॥ अवतंसादीनि कर्णाद्याभरणान्येवोच्यन्ते ॥ तत्र कर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये यथा ॥

अस्याः कर्णावतंसेन जितं सर्व्वं विभूषणं। तथैव शोभतेत्य न्तमस्याः श्रवणकुण्डलं । अपूर्व्वमधुरामोदप्रमोदितदिश स्ततः। आययुर्भृङ्गमुखराः शिरःशेखरशालिनः ॥

अत्र कर्णश्रवणशिरःशब्दाः सन्निधानप्रतीत्यर्थाः ॥

विदीर्णाभिमुखारातिकराले सङ्गरान्तरे। धनुर्ज्याकिण चिह्नेन दोष्णा विस्फुरितं तव ॥

अत्र धनुःशब्द आरूढत्वावगतये ॥ अन्यत्रतु ॥

ज्याबन्धनिस्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरम्परेण। कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमाप्रसादादिति ॥

अत्र केवलोज्याशब्दः ॥

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः। मुक्ताहारेण लसता हसतीव स्तनद्वयं ॥

अत्र मुक्तानामन्यरत्नामिश्रितत्वबोधनायमुक्ताशब्दः ॥

सौन्दर्य्यसम्पत्तारुण्यं यस्यास्ते तेच विभ्रमाः। षट्पदान्पुष्पमालेव कान्नाकर्षति सासखे॥

अत्रोत्कृष्टपुष्पविषये पुष्पशब्दः। निरुपपदोहि मालाशब्दः पुष्पस्रजमेवाभिधत्ते। स्थितेष्वेतत्सम

र्थनं । न खलु कणवितंसादिवज्जघनकाञ्चीत्यादि क्रियते। जगाद मधुरांवाचं विशदाक्षरशालिनी मित्यादौ क्रियाविशेषणत्वेपि विवक्षितार्थप्रतीति सिद्धौ गतार्थस्याविशेष्यस्य विशेषणदानार्थं क्वचित्प्रयोगः कार्य्यइति न युक्तं । युक्तत्वे वा ॥

चरणत्र परित्राणरहिताभ्यामपि द्रुतं । पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते॥

इत्युदाहार्य्यं। ख्यातेऽर्थे निर्हेतोरदुष्टता ॥ यथा ॥

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्यां उमामुखन्तु प्रतिपद्य लोलादिसंश्रयां प्रीतिमवाप लक्ष्मीः ॥

अत्र रात्रौ पद्मस्य सङ्कोचोदिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति नभुङ्क्ते इति हेतुं नापेक्षते ॥ अनुकरणे तु सर्व्वेषां श्रुतिकटुप्रभृतीनां दोषाणां यथा ॥

मृगचक्षुषमद्राक्षमित्यादिकथयत्ययं । पश्यैष च गवित्याह सुत्रामाणं यजेतिच ॥

वक्त्राद्यौचित्यवशाद्दोषोपि गुणः क्वचित्क्वचिन्नोभौ वक्तृप्रतिपाद्य व्यङ्ग्यवाच्यप्रकरणादीनां महिम्ना दोषोपि क्वचिद्गुणः । क्वचिन्न दोषो न गुणः तत्र वैयाकरणादौ वक्तरि प्रतिपाद्येव।

रौद्रादा च रसे व्यक्ती कष्टत्वं गुणः। क्रमेणोदाहरणं॥

दीधीवेवीङ्समः कश्चिद्गुणवृद्धोरभाजनं। क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते ॥ यदा त्वामहमद्राक्षं शब्दविद्याविशारदं। उपाध्यायं तदास्मार्षं समस्प्राक्षं च सम्मदं ॥ अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कणप्रायःप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्। पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति॥ वाच्यवशाद्यथा॥ मातङ्गाः किमुवल्गितैः किमफलैराडम्बरैर्जम्बुकाः सारङ्गा महिषामदं व्रजत किं शून्येष शूरा न के। कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः शनैः सिन्धुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितं ॥

अत्र सिंहे वाच्ये परुषाः शब्दाः॥ प्रकरणवशाद्यथा॥

रक्ताशोककृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं नो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः। उत्कण्ठाघटमानषट्पदघटा संघट्टदष्टच्छदस्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोयं कुतः॥

अत्र शिरोधूननेन कुपितस्य वचसि कश्चिन्नीरसेन गुणो न दोषः॥ यथा॥

शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन्यः। घर्मांशो
स्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्दत्तार्घाः सिद्धसंघैर्वि
दधतु घृणयः शीघ्रमंहोविघातं॥

अप्रयुक्तनिहतार्थौ श्लेषादावदुष्टौ। यथा॥

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो यश्चोद्
वृत्तभुजङ्गहारवलयो गङ्गाञ्च योऽधारयत्। यस्याहुः शशिम
च्छिरोहर इति स्तुत्यञ्च नामामराः पायात्स स्वयमन्धकक्षय
करस्त्वां सर्वदोमाधवः॥

अत्र माधवपक्षे शशिमदन्धकक्षयकरशब्दाव
प्रयुक्तनिहतार्थौ ॥ अश्लीलं क्वचिद्गुणो यथा ॥
सुरतारम्भगोष्ठ्यां॥

द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्विति कामशास्त्रस्थितौ॥
करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते। उपसर्पन् ध्वजः
पुंसः साधनान्तर्विराजते। शमकथासु। उत्तानोच्छूनमण्डूक
पाटितोदरसन्निभे। क्लेदिनि स्त्रीव्रणे सक्तिरक्रिमेः कस्य
जायते॥ निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुत
नयाः सह माधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था
भवन्तु कुरुराजसुताः सभृत्याः॥

अत्र भाव्यमङ्गलसूचकं। सन्दिग्धमपि वाच्य

मस्त्विना क्वचिन्नियतार्थप्रतीतिमिच्छन् व्याजस्तुति पर्य्यवसायित्वे गुणः ॥ यथा ॥

पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनदेव । विलसत्करेणुगहनं संप्रतिसममावयोः सदनं ॥

प्रतिपाद्यप्रतिपादकयोर्ज्ञत्वे सत्यप्रतीतङ्गुणो यथा ॥

आत्मारामाविहितरतयोनिर्व्विकल्पे समाधौ ज्ञानोद्रेकाद्विघटितमनोग्रन्थयः सत्त्वनिष्ठाः । यम्वीक्षन्ते कमपि तमसां ज्योतिषां वापरस्तात्तं मोहान्धः कथमयममुं वेत्ति देवं पुराणं ॥

स्वयंवा परामर्शेयथा ॥

षडधिकदशनाडीचक्रमध्यस्थितात्मा हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः । अविचलितमनोभिःसाधकैर्म्मृग्यमाणः स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥

अधमप्रकृत्युक्तिषुग्राम्योगुणः ॥ यथा ॥

फुल्लुक्करं कलमकूरसिहं वहन्ति जे सिन्दुवारविडवा मह वल्लहा दे । जे गालिदस्समहिसीदहिणोसरिच्छा ते किंचमुद्ध विअइल्लपसूणपुञ्जा ।

अत्र कलमभक्तमहिषीदधिशब्दाग्राम्या अपि विदूषकोक्तौ ॥ न्यूनपदंक्वचिद्गुणोयथा ॥

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सान्द्रस्नेह रसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा । मामामानदमातिमा मलमिति क्षामाक्षरोल्लापिनी सुप्ता किं नु मृता नु किं मनसि किं लीना विलीना नु किं ॥

क्वचिन्न गुणो न दोषः । यथा ॥

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः । तां हर्त्तुं विबुधद्विषोपि न च मे शक्ताः पुरोवर्त्तिनीं सा चात्यन्तमगोचरं नयनयोर्यातेति कोयं विधिः ॥

अत्र पिहितेत्यतोनन्तरं नैतद्यतइत्येतैर्न्यूनैः पदैर्विशेषविधेरकरणान्न गुणः उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधतइति न दोषः ॥ अधिक पदं क्वचिद्गुणः ॥ यथा ॥

यद्वञ्चनाहितमतिर्बहुचाटुगर्भं कार्य्योन्मुखः खलजनः कृतकं ब्रवीति । तत्साधवो न विदन्ति विदन्ति किन्तु कर्त्तुं वृथा प्रणयमस्य न पारयन्ति ॥

अत्र विदन्तीति द्वितीयमन्ययोगव्यवच्छेदपरं॥ यथावा॥

वद वदजितः स शत्रुर्नहतोजल्पंश्च तवतवास्मीति । चित्रं चित्रमरोदीद्धाहेति परं मृते पुत्रे ॥

इत्येवमादौ हर्ष भयादियुक्ते वक्तरि ॥ कथित पदं क्वचिद्गुणः ॥ लाटानुप्रासे अर्थान्तरसंक्रमित वाच्ये विहितस्यानुवाद्यत्वेच क्रमेणोदाहरणं ॥

सितकरकररुचिरविभाविभाकराकारधरणिधरकीर्त्तिः।
पौरुषकमलाकमलासापि तवैवास्ति नान्यस्य ॥ ताला जाअन्ति गुणा जाला दे सहिएहिँ घेप्पन्ति। रइ किरणाणुगहिआइं होन्तिकमलाइं कमलाइं ॥ जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षोविनयादवाप्यते। गुणप्रकर्षेण जनोनुरज्यते जनानुरागप्रभवाहि संपदः॥

पतत्प्रकर्षमपि क्वचिद्गुणः॥ यथा ॥-उदाहृते प्रागप्राप्तेत्यादौ ॥ समाप्तपुनरात्तं क्वचिन्न गुणो न दोषः॥ यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणमपि तु वाक्यान्तरमेव क्रियते॥ यथात्रैव प्रागप्राप्तेत्यादौ ॥ अपदस्थसमासोक्वचिद्गुणः ॥ यथा उदाहृते रक्ताशोकेत्यादौ॥ गर्भितं तथैव यथा॥

होमि अवहत्थिअरेहाणिरङ्कुसो अहविवेअरहिओ वि।
सिविणेवि तुमम्मि पुणो पत्तिहि भत्तिंण पसुमरामि॥

अत्र प्रतीहीतिमध्ये दृढ प्रत्ययोत्पादनाय एवमन्यदपि लक्ष्यालक्ष्यं ॥ व्यभिचारिरसस्थायिभावानां शब्दवाच्यता। कष्टकल्पनया व्यक्तिरनुभाव

विभावयोः । प्रतिकूलविभावादिग्रहोदीप्तिः पुनः पुनः ॥ अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः । अङ्गिनोननुसन्धानं प्रकृतीनां विपर्य्ययः ॥ अनङ्गस्याभिधानञ्च रसे दोषाःस्युरीदृशाः । स्वशब्दोपादानं व्यभिचारिणोयथा ॥

सव्रीडा दयितानने सकरुणा मातङ्गचर्म्माम्बरे सत्रासा भुजगे सविस्मयरसा चन्द्रे मृतस्यन्दिनि । सेर्ष्या जन्हुसुतावलोकनविधौ दीना कपालोदरे पार्व्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ॥

अत्र व्रीडादीनां ॥ व्यानम्रादयितानने मुकुलितामातङ्गचर्माम्बरे सोत्कम्पाभुजगे निमेषरहिताचन्द्रे मृतस्यन्दिनि। मीलद्भ्रूःसुरसिन्धुदर्शनविधौ म्लानाकपालोदरे । इत्यादि तु युक्तं ॥ रसस्य स्वशब्देन शृङ्गारादिशब्देन वाच्यत्वं ॥ क्रमेणोदाहरणं ॥

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकितां । नेत्रयोः कृतवतोऽस्य गोचरे कोप्यजायत रसोनिरन्तरः ॥ आलोक्यकोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिरामरूपां पश्यैष बाल्यमतिवृत्यविवर्त्तमानः शृङ्गारसीमनि तरङ्गितमातनोति ॥

स्थायिनोयथा ॥

संप्रहारे प्रहरणैः प्रहाराणां परस्परं। ठणत्कारैःश्रुतिगतैरुत्साहस्तस्य कोप्यभूत्॥

अत्रोत्साहस्य॥

कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः। लीलाशिरोंशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा॥

अत्रोद्दीपनालम्बनरूपाः शृङ्गारयोग्या विभावा अनुभावपर्य्यवसायिनः स्थिता इति कष्टकल्पना॥

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्त्तते च भूयः। इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्म्मः॥

अत्र रतिपरिहारादीनामनुभावादीनां करुणादावपि सम्भवात्कामिनीरूपोविभावोयत्नतः प्रतिपाद्यः॥

प्रसादे वर्त्तस्व प्रकटय मुदं सन्त्यज रुषं प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः। निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः॥

अत्रशृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपोविभावस्तत्प्रकाशितोनिर्वेदस्य व्यभिचारी उपात्तः॥

णिहुअरमणम्मि लोअणपहम्मि पडिए। गुरुअणमज्झम्मि सअ
लपरिहारहिअआवणगमणं वेअमहइ वहू ॥

अत्र सकलपरिहारवनगमने शान्तानुभावौ। इन्धनाद्यानयनव्याजेनोपभोगार्थं वनगमनं चेत्र दोषः ॥ दीप्तिः पुनः पुनर्यथा ॥ कुमारसम्भवे रतिविलापे। अकाण्डेच्छेदो यथा ॥ वीरचरिते द्वितीयेऽङ्के राघवभार्गवयोर्धाराधिरूढे वीररसे कङ्कणमोचनाय गच्छामीति राघवस्योक्तौ ॥ अङ्गस्याप्रधानस्याति विस्तरेण वर्णनं ॥ यथा ॥ हयग्रीववधे हयग्रीवस्य। अङ्गिनोननुसन्धानं यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च ॥ वीररौद्रशृङ्गारशान्तरस प्रधाना धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्ता उत्तममध्यमाधमाश्च ॥ तत्र रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद्दिव्येष्वपि। किन्तु रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया ॥ तद्वर्णनं हि पित्रोः संभोगवर्णनमिवात्यन्तमनुचितं ॥

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥

इत्युक्तावज्रभ्रुकुट्यादिविकारवर्जितःसद्यः फलदः क्रोधः। स्वर्गपातालगगनसमुद्रोल्लङ्घनाद्युत्साहस्तु दिव्येष्वेव ॥ अदिव्येषु तु यावदवदानं प्रसिद्धमुचितं वा तावदेवोपनिबद्धव्यं । अधिकन्तु निबध्यमानमसत्यप्रतिभासेन नायकवद्वर्त्तितव्यं न प्रतिनायकवदित्युपदेशेन पर्य्यवस्येत् दिव्यादिव्येषूभयथापि॥ एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्तादीनामप्यन्यथावर्णनं विपर्य्ययः ॥ तत्र भवन्भगवन्नित्युत्तमेनाधमेन मुनिप्रभृतौ न राजादौ भट्टारकेति न राजादौ परमेश्वरेति न मुनिप्रभृतौ प्रकृतिविपर्य्ययापत्तेर्वाच्यं ॥ एवं देशकालवयोजात्यादीनां वेशव्यवहारादिकमुचितमेवोपनिबद्धव्यं॥ अनङ्गस्य रसानुपकारकस्य वर्णनं यथा ॥ कर्पूरमञ्जर्य्यां नायिकया स्वात्मना च वसन्तवर्णनमनादृत्य वन्दिवर्णितस्य राज्ञः प्रशंसनं ईदृशा इति नायिकापादप्रहारादिना नायककोपादिवर्णनं॥ उक्तंहि ध्वनिकृता ॥ अनौचित्यादृतेनान्यद्रसभङ्गस्य कारणं । प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परेति ॥५८॥५९॥६०॥ इदानीं

क्वचिददोषा अप्येतइत्युच्यन्ते ॥ न दोषः स्वपदेनो क्तावपि सञ्चारिणः क्वचित् ॥ यथा ॥

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः । दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरीनवे संगमे संरोहत्पुलकाहरेण हसताश्लिष्टा शिवायास्तु वः ॥

अत्रौत्सुक्यशब्द इव तदनु विभावेन तथा प्रतीतिकृत् ॥ अतएव दूरादुत्सुकमित्यादौ व्रीडा प्रेमाद्यनुभावानां विवलितत्वादीनामिवोत्सुकत्वानुभावस्य सहसा प्रसारणादिरूपस्य तथा प्रतिपत्तिकारित्वाभावादुत्सुकमिति कृतं ॥ सञ्चार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा ॥ बाध्यस्योक्तिर्न परं नदोषोयावत्प्रकृतरसपरिपोषकृत् ॥ यथा ॥ क्वाकार्य्यं शशलक्ष्मणः क्व च कुलमित्यादावत्र वितर्कादीषूद्गतेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः ॥

पाण्डुक्षामं वदनंहृदयं सरसं तवालसञ्च वपुः । आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥

इत्यादौ साधारणत्वं पाण्डुतादीनामिति न विरुद्धं ॥

कतमे मनोरमा रामाः सत्यं रम्या विभूतयः । किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितं ॥

इत्यत्राद्यमर्द्धं बाध्यत्वेनैवोक्तं ॥ जीवितादप्यधिकमपाङ्गभङ्गस्यास्थिरत्वमिति प्रसिद्धभङ्गुरोपमानतयोपात्तं शान्तमेव पुष्णाति । न पुनः शृङ्गारस्यात्र प्रतीतिस्तदङ्गाप्रतिपत्तेः न तु विनेयोन्मुखीकरणमत्र परिहारः । शान्तशृङ्गारयोर्नैरन्तर्य्यस्याभावात् ॥ नापि काव्यशोभाकरणं ॥ रसान्तरादनुप्रसमाचाद्वा तथाभावात् ॥ आश्रयैक्ये विरुद्धो यः स कार्य्योभिन्नसंश्रयः ॥ रसान्तरेणान्तरितो नैरन्तर्य्येण यो रसः ॥ वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः । शान्तशृङ्गारयोस्तु नैरन्तर्य्येण विरोधइति रसान्तरमन्तरे कार्य्यं ॥ यथा नागानन्दे शान्तस्य जीमूतवाहनस्य । अहो गीतमहो वाद्यमित्यद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो वर्णितः ॥ न परं प्रबन्धे यावदेकस्मिन्नपि वाक्ये रसान्तरव्यवधिना विरोधो निवर्त्तते ॥ यथा ॥

भूरेणुदिग्धा नवपारिजातमालारजोवासितबाहुमध्याः ।
गाढं शिवाभिः परिरभ्यमाणा सुराङ्गनाश्लिष्टभुजान्तराला: ॥

रसस्य रसान्तरेण न विरोधः ॥ नाप्यङ्गाङ्गिभावो भवतीति रसशब्देनात्र तत्स्थायिभाव उपलच्यते ॥ ६१ ॥

इति काव्यप्रकाशे दोषदर्शनोनाम सप्तमउल्लासः॥

एवं दोषानुक्ता गुणालङ्कारविवेकमाह ॥ ये रसस्याङ्गिनोधर्माः शौर्य्यादयइवात्मनः। उत्कर्ष हेतवस्तेस्युरचलस्थितयोगुणाः ॥ आत्मन एवहि यथा शौर्य्यादयोनाकारस्य तथा रसस्यैव माधुर्य्या दयोगुणा न वर्णानां ॥ क्वचित्तु शौर्य्यादिसमुचित स्याकारमहत्त्वादेर्दर्शनादाकारएवास्य शूरइत्या देर्व्यवहारादन्यत्राशूरेपि विततात्कतित्वमात्रेण शूरइति क्वापि शूरेपि मूर्त्तिलाघवमात्रेणाशूर इत्यविश्रान्तप्रतीतयोयथाव्यवहरन्ति । तद्वन्मधुरा दिव्यञ्जकसुकुमारवर्णानां माधुर्य्यव्यवहारप्रवृत्ते रमधुरादिरसाङ्गानां वर्णानां सौकुमार्य्यादिमा त्रेण माधुर्य्यादि । मधुरादिरसोपकरणानां तेषाम सौकुमार्य्यादेरमाधुर्य्यादिरसपर्य्यन्तविश्रान्तप्रतीति वन्ध्याव्यवहरन्ति॥ अतएव माधुर्य्यादयोरसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते। नतु वर्णमात्राश्रयाः।यथैषां व्यञ्जकत्वं तथोदाहरिष्यते॥ उपकुर्व्वन्ति तं सन्तं

येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेनु
प्रासोपमादयः ॥ ये वाचकवाच्यलक्षणाङ्गातिशयमु
खेन मुख्यं रसं सम्भविनमुपकुर्वन्ति । ते कण्ठाद्यङ्गा
नामुत्कर्षाधानद्वारेण शरीरिणोप्युपकारका हारा
दय इवालंकाराः ॥ यत्रतु नास्ति रसस्तत्रोक्तिवैचि
त्र्यमात्रपर्य्यवसायिनः ॥ क्वचित्तु सन्तमपि नोपकु
र्व्वन्ति ॥ यथा क्रममुदाहरणानि ॥

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः । अलम
लमालिमृणालैरिति वदति दिवानिशं वाला ॥

इत्यादौ वाचकमुखेन ॥

मनोरागस्तीव्रं विषमिव विसर्प्पत्यविरतं प्रमाथीनिर्धूमं
ज्वलति विधुतः पावकइव । हिनस्तिप्रत्यङ्गं ज्वरइववलीया
नितइतोन मां त्रातुं तातः प्रभवति न चाम्बा न भवती ॥

इत्यादौ वाच्यमुखेनालङ्कारौ रसमुपकुरुतः ॥

चित्ते विहट्टदि णखुट्टदिसागुणेसुंसेज्जासुलुठदि विसप्पदि
दिम्मुहेसुम् । बोलम्मिवट्टदिपवट्टदिकव्ववन्धेझाणेणतुट्टदि
चिरं तरुणीतरङ्गी ॥

इत्यादौ वाचकमेव ॥

मित्रे क्वापि गतेसरोरुहवने बद्धाननेताम्यति क्रन्दत्सु भ्रम
रेषु वीक्ष्य दयितासन्नं पुरः सारसीं । चक्राह्वेन वियोगिना

विलसता नास्वादिता नोज्झिता कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ॥

इत्यादौ वाच्यमेव नतु रसं ॥ अत्र विलसता न जीवं रोद्धुंचमेति प्रकृताननुगुणोपमा ॥ एष एवच गुणालङ्कारप्रविभागः ॥ एवंसमवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादयइत्यस्तु गुणालङ्काराणां भेदः । ओजःप्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैषां भेदइत्यभिधानमसत् ॥ यदप्युक्तं काव्यशोभायाः कर्त्तारोधर्म्मा गुणास्तदतिशयहेतवस्त्वलङ्कारा इति ॥ तदपि न युक्तं ॥ यतः किं समस्तैर्गुणैःकाव्यव्यवहार उत कतिपयैर्यदिसमस्तैस्तत्कथमसमस्तगुणागौडी पाञ्चालीच रीतिः काव्यस्यात्मा ॥ अथ कतिपयैस्तत्कथं ततः ॥ अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यःप्रोद्यन्नुल्लसत्येष धूम इत्यादावोजःप्रभृतिषु गुणेषु सत्स्वपि न काव्यव्यवहारः।स्वर्गप्राप्तिरनेनैवदेहेन वरवर्णिनि। अस्यारदच्छदरसोन्यक्करोतितरां सुधामित्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारप्रवर्त्तकौ ॥ इदानीं गुणानां भेदमाह ॥

माधुर्य्यौजःप्रसादाख्यास्त्रयस्तेन पुनर्दश ॥ एषां क्रमेण लक्षणमाह ॥ आह्लादकत्वं माधुर्य्यं शृङ्गारे द्रुतिकारणं । शृङ्गारेऽर्थात्संभोगे द्रुतिर्गलितत्वमिव ॥ श्रव्यत्वं पुनरोजःप्रसादयोरपि ॥ करुणे विप्रलम्भे तच्छान्तेचातिशयान्वितं । अत्यन्तद्रुतिहेतुत्वात् ॥ दीप्त्यात्मविस्तृतेर्हेतुरोजोवीररसस्थितिः । चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः । वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेणच ॥ वीराद्वीभत्से ततो रौद्रे सातिशयमोजः । शुष्केन्धनाग्निवत्स्वच्छजलवत्सहसैव यः । व्याप्नोत्यन्यत्प्रसादोसौ सर्व्वत्रविहितस्थितिः ॥ अन्यदिति व्याप्यमिहचित्तं सर्व्वत्रेति सर्व्वेषु रसेषु सर्वासु रचनासु च । गुणवृत्त्या पुनस्तेषां वृत्तिःशब्दार्थयोर्म्मता ॥ गुणवृत्त्या उपचारेण तेषां गुणानां ॥ आकारे शौर्य्यस्येव ॥ ६८ ॥ ॥ ६८ ॥ कुतस्त्रयएव न दशेत्याह केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः ॥ अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततोदश ॥ बहूनामपि पदानामेकपदवद्भासनात्मा यः श्लेषोयस्मारोहावरोहक्रमरूपः समाधिर्योच विकटत्वलक्षणा उदारता यश्चोजो

मिश्रितशैथिल्यात्माप्रसादस्तेषामोजस्यन्तर्भावः । पृथक्पदत्वरूपं माधुर्य्यंभङ्ग्या साक्षादुपात्तं ॥ प्रसादेनार्थव्यक्तिर्गृहीता मार्गाभेदरूपा समता क्वचिद्दोषः ॥ तथाहि ॥

मातङ्गाः किमु वल्गितैरित्यादौ ॥

सिंहाभिधाने मसृणमार्गत्यागोगुणः ॥ कष्टत्वग्राम्यत्वयोर्दुष्टताभिधानात्तन्निराकरणेनापारुष्यरूपं सौकुमार्य्यमौज्वल्यरूपा कान्तिश्च स्वीकृता ॥ एवं नदशशब्दगुणाः ॥ पदार्थे वाक्यरचनं वाक्यार्थेच पदाभिधा। प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य चेति या प्रौढिरोजइत्युक्तं तद्वैचित्र्यमात्रं न गुणस्तदभावेपि काव्यव्यवहारप्रवृत्तेः। अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामङ्गलरूपाऽश्लीलग्राम्याणां निराकरणेनच साभिप्रायत्वरूपमोजोऽर्थवैमल्याप्रसादउक्तिवैचित्र्यरूपंमाधुर्य्यमपारुष्यरूपं सौकुमार्य्यमग्राम्यत्वरूपा उदारताच स्वीकृतानि॥ अभिधास्यमानस्वभावोक्त्यलङ्कारेणरसध्वनिगूणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपार्थव्यक्तिः दीप्तरसत्वरूपा कान्तिश्च स्वीकृता॥ क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्माश्लेषोपि विचि

त्वमात्रं॥ अवैषम्यस्वरूपा समता दोषाभावमात्रं न पुनर्गुणः ॥ कः खल्वनुन्मत्तोऽन्यस्य प्रस्तावेऽन्यद् भिदध्यात् ॥ अर्थस्यायोनेरन्यच्छायायोनेर्वायदि न भवति दर्शनं तत्कथं काव्यमित्यर्थदृष्टिरूपः समाधिरपि न गुणः। तेन नार्थगुणाः वाच्याः वाच्या वक्तव्याः प्रोक्ताःशब्दगुणाश्च ये॥ वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥ के कस्येत्याह ॥ मूर्द्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गारणौ लघू। अवृत्तिर्मध्यवृत्तिर्वामाधुर्य्ये घटना तथा॥ टठडढवर्ज्जिताः कादयो मान्ताः शिरसि निजवर्गान्त्ययुक्तास्तथा रेफणकारौ ह्रस्वांतरिताविति वर्णाः ॥ समासाभावोमध्यमः समासोवेति समासस्तथा माधुर्य्यवतोपदान्तरयोगे रचना माधुर्य्यस्यव्यञ्जिका॥ उदाहरणं ॥

अनङ्गरङ्गप्रतिमन्तदङ्गभङ्गीभिरङ्गीकृतमाननाङ्ग्याः ।
कुर्व्वन्ति यूनां सहसा यथैताःस्वान्तानिशान्तापरचिन्तनानि॥

योग आद्यतृतीयाभ्यामन्त्ययोरेणतुल्ययोः।टादिः शषौवृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥ वर्गप्रथमतृतीयाभ्यामन्त्ययोस्तद्द्वितीयचतुर्थयोः रेफेणाधउपर्य्युभयत्र वा यस्य कस्यचित्तुल्ययोस्तेन तस्यैव

सम्बन्धः ॥ टवर्गोऽर्थात् णकारवर्जः । शकारषकारौ दीर्घसमासो विकटा संघटना ओजसः । उदाहरणं ॥

मूर्ध्नामुद्वृत्तकृत्तेत्यादि ॥ ७२ ॥

श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् । साधारणः समग्राणां स प्रसादो गुणः स्मृतः ॥ समग्राणां रसानां संघटनानाञ्च । उदाहरणं ॥

परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितं । इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनं ॥

यद्यपि गुणपरतन्त्राः संघटनादयस्तथापि वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित् । रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥ क्वचिद्वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः ॥ यथा ॥

मन्थायस्तार्णवाम्भः प्लुतिकुहरचलन्मन्दरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः । कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽसौ ॥

अत्र हि न वाच्यं क्रोधादिव्यञ्जकमभिनेयार्थञ्च काव्यमिति तत्प्रतिकूला उद्धतारचनादयः

वक्ता चात्र भीमसेनः ॥ क्वचिद्वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः ॥ यथा ॥

प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघातत्रासाकृष्टाश्वतिर्य्यग्वलितरविरथेनारुणेनेक्ष्यमाणं। कुर्व्वत्काकुत्स्थवीर्य्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां भाङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गं ॥

क्वचिद्वक्तृवाच्यानपेक्षाः प्रबन्धोचिता एव ते ॥ तथा ह्याख्यायिकायां शृङ्गारेपि न मसृणवर्णादयः कथायां रौद्रेपि नात्यन्तमुद्धताः ॥ नाटकादौ रौद्रेऽपि नदीर्घसमासादयः ॥ एवमन्यदप्यौचित्यमनुसर्त्तव्यं ॥ इति श्री काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयोनामाष्टम उल्लासः ॥

गुणविवेचने कृतेऽलङ्काराः प्राप्तावसरा इति। संप्रति शब्दालङ्कारानाह ॥ यदुक्तमन्यथावाक्यमन्यथान्येन योज्यते। श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ॥ तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च ॥ पदभङ्गश्लेषेण। यथा ॥

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां प्रियमादधाति हि सक्तन्नैवावलानां भवान्। युक्तं किं हित

कर्त्तनं ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरन्दरस्य तच्छेदं विधातुं कुतः ॥

अभङ्गश्लेषेण यथा ॥

अहो केनेदृशी बुद्धिर्दारुणा तवनिर्मिता त्रिगुणाश्रूयते बुद्धिर्नतु दारुमयी क्वचित् ॥

काक्वा यथा ॥

गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतोगन्तुं। अलिकुल कोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ॥

वर्णसाम्यमनुप्रासः ॥ स्वरवैसादृश्येपि व्यञ्जन सदृशत्वं वर्णसाम्यं ॥ रसाद्यनुगतःप्रकृष्टोन्यासोऽनुप्रासः ॥ छेकवृत्तिगतोद्विधा ॥ छेकाः विदग्धाः ॥ वृत्तिर्नियतवर्णगतोरसविषयोव्यापारः ॥ गतइति छेकानुप्रासोवृत्त्यनुप्रासश्च ॥ किन्तयोःस्वरूपमित्याह ॥ सोऽनेकस्य सकृत्पूर्व्वः ॥ अनेकस्य अर्थात् व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः ॥ उदाहरणं ॥

ततोरुणपरिस्पन्दमन्दीकृतवपुः शशी। दध्रे कामपरिक्षाम कामिनीगण्ड पाण्डुतां ॥

एकस्याप्यसकृत्परः। एकस्याऽपि शब्दादनेकस्य व्यञ्जनस्य द्विर्बहुकृत्वोवा सादृश्यं वृत्त्यनुप्रासः ॥

माधुर्य्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते। ओजः प्रकाशकैस्तैस्तु परुषाउभयत्रापि प्रागुदाहृतम् ॥ कोमलापरैः ॥ परैः शेषैः ॥ तामेव केचित्ग्राम्येति वदन्ति ॥ उदाहरणं ॥

अपसारय घनसारं कुरु हारं दूरएव किं कमलैः। अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥

केषाञ्चिदेता वैदर्भीप्रमुखारीतयोमताः ॥ एतास्तिस्रोवृत्तयोवामनादीनां मते वैदर्भीगौडीपाञ्चाल्याख्या रीतयो मताः ॥ शाब्दस्तु लाटानुप्रासोभेदे तात्पर्य्यमात्रतः ॥ शब्दगतोनुप्रासः। शब्दार्थयोरभेदेप्यन्वयमात्रभेदाल्लाटजनवल्लभत्वाच्चलाटानुप्रासः ॥ एष पदानुप्रासइत्यन्ये ॥ पदानां सः ॥ स इति लाटानुप्रासः ॥ उदाहरणं ॥

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य। यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥

पदस्यापि ॥ अपिशब्देन सइति समुच्चीयते ॥ उदाहरणं ॥

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः। सुधाकरः क नु पुनः कलङ्कविकलोभवेत् ॥

वृत्तावन्यत्रतत्र वा ॥ नाम्नः स वृत्त्यवृत्त्योश्च ॥

एकस्मिन्समासे भिन्ने वासमासे समासासमास योर्व्वा। नाम्नः प्रातिपदिकस्य नतु पदस्य साहृप्यं ॥ उदाहरणं ॥

सितकरकररुचिरविभा विभाकराकारधरणिधरकीर्त्तिः। पौरुषकमलाकमला सापि तथैवास्ति नान्यस्य ॥ तदेवंपञ्च धामतः ॥

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः। यमकम् ॥ समरसमरसोयमित्यादावेकेषामर्थवत्त्वे अन्येषामनर्थवत्त्वे भिन्नार्थानामिति न युज्यते वक्तु मित्यर्थे सतीत्युक्तं ॥ सेतिसरोरस इत्यादिवैलक्ष ण्येन तेनैव क्रमेण स्थिता॥ पादतङ्गागवृत्तितया त्यनेकतां ॥ प्रथमाद्द्वितीयादौ द्वितीयस्तृतीयादौ तृतीयश्चतुर्थे प्रथमस्त्रिष्वपीति सप्त ॥ प्रथमोद्दिती येतृतीयश्चतुर्थेइति ॥ प्रथमश्चतुर्थे द्वितीयस्तृतीय इति द्वे ॥ तदेवं पादजं नवभेदं ॥ अर्द्धावृत्तिः श्लोकावृत्तिश्चेति द्वे ॥ द्विधाविभक्ते पादे प्रथम पादादिभागः पूर्व्ववत् । द्वितीयतृतीयादिपादा दिभागेष्वंतभागोन्तभागेष्विति विंशति भेदाः ॥ श्लोकान्तरे हि नासौभागावृत्तिः। त्रिखण्डे त्रिंशच्चतुः खण्डेचत्वारिंशत् ॥ प्रथमपादादिगतान्त्यार्द्धादि

भागेद्वितीयपादादिगते आद्यार्द्धादिभागे यस्यत इत्याद्यन्वर्थतानुसरणेनानेकभेदमन्त्यादिकमाद्यन्तिकं तत्समुच्चयः मध्यादिकमादिमध्यमन्तमध्यंमध्यान्तिकं तेषां समुच्चयः तथा तस्मिन्नेव पादेआद्यादिभागानां मध्यादिभागेष्वनियतेवस्थाने आवृत्तिरिति प्रभूततमभेदं ॥ तदेतत्काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतं ॥ दिङ्मात्रमुदाह्रियते ॥

सन्नारीभरणोमायमाराध्य विधुशेखरं । सन्नारीभरणोमायस्ततस्त्वं पृथिवीं जय ॥ विनायमेनोनयता सुखादिना विनायमेनोऽनयता सुखादिना । महाजनोदीयतमानसादरं महाजनोदीयतमानसादरं ॥ सलाऽरम्भरतोवश्यमवलम्बिततारवं । सर्व्वदारणमानैषीदावानलसमस्थितः । सपुनरास्तं स्तोकः ॥ अनन्तमहिमव्याप्तविश्वावेधानवेदयां । या च मातेव भजते प्रणते मानवे दयां ॥ यदानतोयदानतोनयात्ययं नयात्ययं । शिवेहितां शिवेहितां स्मरामि तां स्मरामि तां ॥ समुच्चयमकं । सरस्वतिप्रसादं मे स्थितिचित्तसरस्वति । सरस्वति कुरुक्षेत्र कुरुक्षेत्रसरस्वति ॥ ससार साकन्दर्पेण कन्दर्पेण ससार सा । शरन्नवाना बिभ्राणा नाविभ्राणा शरन्नवा ॥ मधु

पराजि पराजितमानिनी जनमनःसुमनःसुरभिश्रियं। अधृत वारित वारिजविप्लवं स्फुटितताम्रतताम्रवणं जगत्॥

एवंवैचित्र्यसहस्रैःस्थितमन्यदुन्नेयं॥ वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः॥ श्लिष्यन्ति शब्दाः श्लेषोसावक्षरादिभिरष्टधा॥ अर्थभेदेन शब्दभेद इति दर्शने काव्यमार्गे स्वरोन गण्यतइति च नये वाच्यभेदेन भिन्ना अपि शब्दा यद्युगपदुच्चारणेन श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते स श्लेषः॥ सच वर्णपादलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा॥ क्रमेणोदाहरणं॥

अलङ्कारः शङ्काकरनरकपालंपरिजनोविशीर्णाङ्गोभृङ्गी वसुचवृषएकोवकुत्वयाः। अवस्थेयं स्थाणोरपि भवति सर्वा मरगुरोर्व्विधौ वक्रे मूर्ध्निस्थितवति वयं के पुनरमी॥ पृथुकार्त्त स्वरपात्रं भूषितनिःशेषपरिजनं देव। विलसत्करेणुगहनं संप्रति सममावयोः सदनं॥ भक्तिप्रह्वविलोकनप्रणयिनी नीलो त्पलस्पर्द्धिनी ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये। लावण्यैकमहानिधी रसिकतां लक्ष्मीदृशोस्तन्वती युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः॥

एष वचनश्लेषोपि॥

महदे सुरसन्धमेत मवसमासङ्गमागमा हरणे। हरवधूस

रणं चित्तमोहमवसरउमे सहसा ॥ अयं सर्व्वाणि शास्त्राणि हृदि ज्ञेषु च वच्यति । सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः ॥ रजनिरमणमौलेः पादपद्मावलोकचणसमयपराप्तापूर्व्वसम्पत्सहस्रं । प्रथमनिबहमध्ये जातु चित्तप्रसादादहमुचितरुचिः स्यां नन्दितासातथामे ॥ सर्व्वस्वं हरसर्व्वस्यत्वं भवच्छेदतत्परः । नयोपकारसांमुख्य मायासि तनुवर्त्तनं ॥

भेदाभावात्प्रकृत्यादेर्भेदोपि नवमोभवेत् ॥ नवमोपीत्यपिर्भिन्नक्रमः ॥ उदाहरणं ॥

योसकृत्परगोत्राणां पचच्छेदचणचमः । शतकोटिदतां विभ्रद्विबुधेन्द्रः स राजते ॥

अत्र प्रकरणादिनियमाभावाद्द्वावप्यर्थौ वाच्यौ ॥ ननु स्वरितादिगुणभेदात् भिन्नप्रयत्नोच्चार्य्याणां तदभावादभिन्नप्रयत्नोच्चार्य्याणाञ्च शब्दानां बन्धेऽलङ्कारान्तरप्रतिभोत्पत्तिहेतुः शब्दश्लेषोर्थश्लेषश्चेति द्विविधोप्यर्थालंकारमध्ये गणितोन्यैरिति कथमयं शब्दालङ्कारः ॥ उच्यते ॥ इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन योविभागः सान्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते ॥ तथाहि ॥ कष्टत्वादिगाढत्वाद्यनुप्रासादयोव्यर्थत्वादि प्रौढ्याद्युपमादयस्तद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन

व्यवस्थाप्यन्ते ॥ स्वयञ्च पल्लवाताम्रभास्वत्करविराजिते त्वभङ्गःशब्दश्लेषः। प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदेति सभङ्गः शब्दश्लेषश्चेति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नं नत्वाद्यस्यार्थश्लेषत्वं। अर्थश्लेषस्य तु स विषयः। यत्र शब्दपरिवर्त्तनेपि न श्लेषत्वखण्डना ॥

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं। अहो सुसदृशीवृत्तिस्तुलाकोटेः खलस्य च ॥

नचायमुपमाप्रतिभोत्पत्तिहेतुः श्लेषोपितु श्लेषप्रतिभोत्पत्ति हेतु रुपमा ॥ तथाहि । यथा ॥ कमलमिव मुखं मनोज्ञमेतत्कचतितरामित्यादौ गुणसाम्ये क्रियासाम्ये उभयसाम्येवा उपमा ॥ तथा ॥ सकलकलं पुरमेतज्जातं संप्रति सितांशुविम्बमिवेत्यादिशब्दमात्र साम्येपि सा युक्तैव ॥ तथाह्युक्तं रुद्रटेन ॥ स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किंतु आश्रित्यशब्दमात्रं सामान्यमिहापि सम्भवत इति ॥ नच कमलमिव मुखमित्यादिः साधारणधर्म्मप्रयोगशून्यउपमाविषय इति वक्तुं युक्तं॥पूर्णोपमायानिर्विषयत्वापत्तेः॥

देव त्वमेव पातालमाशानां त्वं निबन्धनं । त्वं चामरम
रुद्भूमिरेको लोकचयात्मकः ॥

इत्यादिः श्लेषस्य चोपमाद्यलङ्कारविविक्तोस्ति
विषय इति द्वयोर्योगे सङ्कर एव ॥ उपपत्तिपर्य्या
लोचने तु उपमाया एवायं युक्तोविषयः अन्यथा
विषयापहार एवपूर्णोपमायाः स्यात् ॥ नच अविन्दु
सुन्दरी नित्यं गलल्लावण्यविन्दुकेत्यादौ विरोध
प्रतिभोत्पत्तिहेतुः श्लेषोपि तु श्लेषप्रतिभोत्पत्तिहेतु
र्विरोधः ॥ नह्यत्रार्थद्वयप्रतिपादकः शब्दश्लेषोदिती
यार्थस्य प्रतिभातमात्रस्य प्ररोहाभावात् ॥ नच
विरोधाभासइव विरोधः । श्लेषाभासः श्लेषस्त
देवमादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारा
न्तरमेव ॥ तथा च ॥

सद्वंशमुक्तामणिः नान्यः कविरिव स्वल्पश्लोकोदेवमहान्
भवान् ॥ अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः । अहो दैव
गतिश्चित्रा तथापि न समागमः ॥ आदाय चापमचलं कृत्वा
हीनं गुणं विषमदृष्टिः । यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नम
स्तस्मै ॥

इत्यादा वेकदेशविवर्त्तिरूपकश्लेषव्यतिरेक
समासोक्तिविरोधत्वमुचितं ॥ नतु श्लेषत्वं शब्दश्लेष

इतिचोच्यते ॥ अर्थालङ्कारमध्ये च लक्ष्यतइति कोयं नयः ॥ किञ्च वैचित्र्यमलङ्कार इति यएव कविप्रतिभा संरम्भगोचरस्तत्रैव विचित्रतेति सैवा लङ्कारभूमिः ॥ अर्थमुखप्रेक्षितत्वमेतेषां शब्दाना मिति चेदनुप्रासादीनामपि तथैवेति तेप्यर्था लङ्काराः किं नोच्यन्ते ॥ रसादिव्यञ्जकस्वरूपवाच्य विशेषसव्यपेक्षत्वेपि ह्यनुप्रासादीनामलङ्कारता ॥ शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता। अर्थ गुणदोषालंकाराणां शब्दापेक्षयैव व्यवस्थितिरिति तेपि शब्दगतत्वेनोच्यन्ताम् ॥ विधौ वक्रे मूर्द्धीत्या दौच वर्णादिश्लेषे एकप्रयत्नोच्चार्य्यत्वेऽर्थश्लेषत्वं शब्दभेदेपि प्रसज्यतामित्येवमादिस्वयं विचार्य्यं ॥ तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ॥ सन्नि वेशविशेषेण यत्र न्यस्तावर्णाः खड्गमुरजपद्माद्या कारमुल्लासयन्ति तच्चित्रं काव्यं ॥ कष्टंकाव्यमेत दिति दिङ्मात्रं प्रदर्श्यते ॥ उदाहरणं ॥

मारारिशक्ररामेभमुखैरासाररंहसा । सारारब्धस्तवा नित्यं तदर्त्तिहरणक्षमा ॥ माता नतानां सङ्घट्टः श्रियां बाधि तसंभ्रमा । मान्याथ सीमा रामाणां शं मे दिश्यादुमादिमा ॥ खड्गबन्धः ॥ सरलावहुलारम्भतरलालिवलारवा । वारला

वङ्कलामन्दकरलावङ्कलामला ॥ मुरजबन्धः ॥ भासते प्रतिभासाररसाभाताहताविभा । भावितात्मा शुभावादे देवाभावत ते सभा ॥ पद्मः ॥ रसासाररसासारसायताचच तायसा । साता वाततवातासा रचतस्वस्वतचर ॥ सर्व्वतो भद्रं ॥

सम्भविनोऽप्यन्ये प्रभेदाः शक्तिमात्रप्रकाशका नतु काव्यरूपतां दधतीति नप्रदर्श्यन्ते ॥ पुनरुक्त वदाभासोविभिन्नाकारशब्दगा । एकार्थतेव भिन्न रूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखे भासनं पुनरुक्तवदाभासः ॥ सच । शब्दस्य सभङ्गाभङ्ग रूपकेवलशब्दनिष्ठः ॥ उदाहरणं ॥

अरिवधदेहशरीरः सहसारथिसूततुरगपादातः। भाति सदान त्यागः स्थिरतायामवनितलतिलकः ॥ चकासत्यङ्गना रामाः कौतुकानन्दहेतवः । तस्य राज्ञस्सुमनसोविबुधाः पार्श्ववर्त्तिनः ॥

तथा शब्दार्थयोरयं । उदाहरणं ॥

तनुवपुरजघन्योसौ करिकुञ्जर रुधिररक्तखरनखरः। तेजोधाममहः पृथुमनसामिन्द्रोहरिर्जिष्णुः ॥

अत्रैकस्मिन्पदे परिवर्त्तिते नालङ्कारइति शब्दा अयोयोगःपरस्मिंस्तु परिवृर्त्तितेपि स न हीयत

इत्यर्थनिष्ठइत्युभयालङ्कारोयं ॥ इतिकाव्यप्रकाशे मम्मटाचार्य्यविरचिते शब्दालङ्कारनिर्णयोनाम नवमउल्लासः॥

अर्थालङ्कारानाह॥ साधर्म्यमुपमा भेदे॥ उपमानोपमेययोरेव नकार्य्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानधर्म्मेण सम्बन्धउपमा॥ भेदग्रहणमन्वयव्यवच्छेदाय पूर्णा लुप्ता च उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा। एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता॥ साग्रिमा श्रौत्यार्थीच भवेद्वाक्ये समासे तद्धिते तथा। अग्रिमापूर्णा॥ यथेववाशब्दायत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत्सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा॥ तथैव तत्र तस्येवेत्यनेनेवार्थे विहितस्य वतेरुपादाने। तेन तुल्यं क्रियाचेद्वतिरित्यादावुपमेय एव ॥ तत्तुल्यमस्येत्यादौ चोपमानएव ॥ इदश्चतच्च तुल्यमित्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्य्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वा

त्वात्तुल्यादिपदोपादाने आर्थी । तदर्त्तेन तुल्य मित्यादिना विहितस्य वतेः स्थितौ ॥ इवेन नित्य समासेविभक्त्यलोपः पूर्व्वपदप्रकृतिस्वरत्वं चेति नित्यसमासे इवशब्दयोगे समासगा । क्रमेणोदा हरणं ॥

स्वप्नेषु समरेषु त्वां विजयश्रीर्न मुञ्चति । प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥ चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारकान्तिः । सरसिजमिदमाननञ्च तस्याः सममिति चेतसि संमदं विधत्ते ॥ अत्यायतैर्नियमकारिभि रुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः । शौरिर्भुजैरिव चतुर्भिरदः सदायोलक्ष्मीविलासभवनैर्भुवनं वभार ॥ अवि तथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः । सुरतरुसदृशः सभवानभिलषणीयः क्षितीश्वरेन कस्य ॥ गाम्भीर्य्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत् । दुरालोकः स समरे निदाघाम्बर रत्नवत् ॥

स्वाधीनपतिका कान्तं भजमाना यथा लोको त्तरचमत्कारभूस्तथाजयश्रीस्त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तौ वैचित्र्यं ॥ वैचित्र्य ञ्चालङ्कारस्तथापि न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारो न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीति

रपि तु वाच्यवैचित्र्यप्रतिभासादेव । रसादिस्तु व्यङ्ग्योऽर्थोऽलंकारान्तरञ्च सर्व्वत्राव्यभिचारीत्यगणयित्वैव तदलङ्कारा उदाहृताः ॥ तदङ्गहितत्वेन तूदाहृियप्रमाणाविरसतामावहन्तीति पूर्व्वापरविरुद्धाभिधानमिति न चोदनीयं ॥ तद्वद्धर्मस्य लोपे स्यान्नश्रौती तद्धिते पुनः । धर्म्मः साधारणः तद्धिते कल्पबादौ चार्थ्येव ॥ तेन पञ्च ॥ उदाहरणं ॥

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः । करणीयं वचश्चेतः सत्यंतस्यामृतं यथा ॥ आकृष्टकरवालोसौ सम्पराये परिभ्रमन् । प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥ करवाल इवाचारस्तस्य वागमृतोपमा । विषकल्पं मनोवेत्सि यदि जीवसि तत्सखे ॥

उपमानानुपादाने वाक्यगाऽथ समासगा ॥

सअलकरणपरवीसा मसिरिविअरणं सरसकव्वस्स । दीसइअहवणमुम्हइसरिसंअंसमेत्तेण ॥

कव्वस्सेत्यत्र कव्वसममिति सरिसमित्यत्र च णूनमिति पाठे एषैव समासगा ॥ वादेर्लोपे समासे सा कर्माधारक्यचिक्यङि । कर्मकर्त्रोर्णमुलि ॥ वाशब्दउपमाद्योतकइति वादेरुपमाप्रतिपादकस्य लोपेषट्समासेकर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा

कर्त्तरि क्यङा च कर्मकर्त्रोरुपपदयोर्णमुला च भवेत्।

उदाहरणं ॥

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना। नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥ तथा ॥ असितभुजगभीषणासिपत्रो रुहिरुहिकाहितचित्ततूर्णचारः। पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेयमासीत् ॥ पौरं सुतीयति जनं समरान्तरेऽसावन्तःपुरीयति विचित्रचरित्रचुञ्चुः। नारीयते समरसीम्नि कृपाणपाणेरालोक्य तस्य चरितानि सपत्नसेना ॥ मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे। स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः ॥

एतद्द्विलोपे क्विप्समासगा एतयोर्धर्मवाद्योः ॥

उदाहरणं ॥

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः। यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥ परिपन्थिमनोराज्यशतैरपि दुराक्रमः। संपरायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ॥

ढुण्ढुल्लन्तो मरिहिसि कण्टअकलिआइं केअइवणाइं। मालइकुसुमसरिच्छं भमर भमन्तो ण पाविहिसि ॥

कुसुमेण सममिति पाठे वाक्यगा क्यचि वाद्युप मेयासे । आसेनिरासे ॥

अरातिविक्रमालोकविकस्वरविलोचनः । कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥

अत्रात्मा उपमेयः । त्रिलोपे च समासगा ॥ त्रयाणां वादिधर्मोपमानानां ॥ उदाहरणं ॥

तरुणिमनिकृतावलोकनाललितविलासविलम्बियद्दा । स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ॥

अत्र सप्तम्युपमाने इत्यादिना यदासमासलोपौ भवतस्तदोदाहरणं ॥

कूराचारस्याय: शूलतयाध्यवसायात् । अयःशूलेनान्विच्छतीत्यायःशूलिकः ॥

इत्यतिशयोक्तिर्नतु क्रूराचारोपमेयतैक्ष्ण्यधर्मवादीनां लोपे त्रिलोपेयमुपमा । एवमेकोनविंशतिर्लुप्ताः पूर्णाभिःसह पञ्चविंशतिः ॥

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता । मम्लौसाथ विषादेन पद्मिनीव हिमाम्भसा ॥

इत्यभिन्ने साधारणे धर्म्मे ॥

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणं । प्रभुतेव समाकृष्टसर्व्वलोका नितम्बिनी ॥

इति भिन्नेच तस्मिन्नेकस्यैव बहूपमानोपादाने मालोपमा ॥ यथोत्तरमुपमेयस्योपमानत्वे पूर्व्ववद् भिन्नभिन्नधर्म्मत्वे ॥

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थततेः। भणितिरिव मतिर्मतिरिव चेष्टाचेष्टेव कीर्त्तिरतिविमला ॥ मतिरिव मूर्त्तिर्मधुरामूर्त्तिरिव सभाप्रभावचिता। तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ॥

इत्यादिका रशनोपमा च न लक्षिता एवम्विध वैचित्र्यसहस्रसम्भवात् ॥ उक्तभेदानतिक्रमाच्च ॥ उपमानोपमेयत्वे एकस्यैवैकवाक्यगे। अनन्वयः। उपमानान्तरसम्बन्धाभावोऽनन्वयः। उदाहरणं ॥

नकेवलं भाति नितान्तकान्तिर्नितम्बिनीसेव नितम्बिनीव। यावद्विलासायुधलास्यवासास्तेतद्विलासा इव तद्विलासाः ॥

विपर्य्यास उपमेयोपमानयोः ॥ तयोरुपमानोपमेययोः परिवृत्तिरर्थाद्वाक्यद्वये इतरोपमानव्यवच्छेदपरा उपमेयेनोपमा इत्युपमेयोपमा। उदाहरणं ॥

कमलेव मतिर्मतिरिव कमला तनुरिवविभाविभेव तनुः। धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥

सम्भावनमथोत्प्रेक्षाप्रकृतस्य समेन यत्। समे
नोपमानेन ॥ उदाहरणं ॥

उन्मेषं यो मम न सहते जातिवैरी निशायामिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्य्यदर्प्पः। नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षाल्लग्नामन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः॥ लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता॥

इत्यादौ व्यापनादि लेपनादिरूपतया सम्भावितं।
ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः॥
भेदोक्तौ ॥ यथा ॥

अयं मार्त्तण्डः किं स खलु तुरगैः सप्तभिरितः कृशानुः किं सर्व्वाः प्रसरति दिशो नैष नियतम्। कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः॥

भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो यावन्निश्चयान्तोऽपि सन्देहः स्वीकृतः॥ यथा॥

इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम्। ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः॥

किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इति उपेक्षितो भट्टोद्भटेन। तदनुक्तौ॥ यथा॥

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः। वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणोमुनिः॥

तद्रूपकमभेदोयमुपमानोपमेययोः॥ अतिसाम्याद्नपह्नुतभेदयोरभेदः समस्तवस्तुविषयम्॥ श्रौता आरोपिता यदा आरोपविषया इवारोप्यमाणा यदा शब्दोपात्तास्तदा समस्तानि वस्तूनि विषयोस्येति समस्तवस्तुविषयं आरोपिता इति बहुवचनमविवक्षितम्॥ यथा॥

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम्। द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य छलेन॥

अत्र पादत्रयमन्तर्धानरसिकत्वमारोपितधर्म्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्सङ्कराशङ्का न कार्य्या॥ अथवा न्यस्तं लाञ्छनमञ्जनं कुमुदिनीप्रोल्लाससिद्धिप्रदमिति चतुर्थः पाद एवं रूपकेणैव निर्व्वाहः॥ श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्त्ति तत्। केचिदारोप्यमाणाः शब्दो

पात्ताः केचिदर्थसामर्थ्यादवसेया इत्येकदेशविव र्त्तनादेकदेशविवर्त्ति ॥ यथा ॥

जस्सरणंते उरएकरे कणंतस्स मण्डलग्गलअं । रसम मुही विसहसा परमुहोहोदरिउसेणा ॥

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तं॥ मण्डलाग्रलताया नायिकात्वं रिपुसेनायाश्च प्रति नायिकात्वमर्थसामर्थ्यादवसीयते इत्येकदेशे विशे षेण वर्त्तनादेकदेशविवर्त्ति । साङ्गमेतत् उक्त द्विभेदं सावयवं निरङ्गन्तु शुद्धं ॥ यथा ॥

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्सखीं कान्तो दन्तं श्रुतमपि पुनः प्रश्नयति यत् । अनिद्रं यच्चान्तः स्वपिति तदहोवेद्म्यभिनवां प्रवृत्तोस्याः सेक्तुं हृदि मनसि जः प्रेमलति काम् ॥

माला तु पूर्व्ववत् । मालोपमायामिवैकस्मिन्च हव आरोपिताः ॥ यथा ॥

सौन्दर्य्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः कान्तेः कार्मणकर्मनर्मरहसामुल्लासनावासभूः । विद्यावक्रगिरां विधे रनवधिप्रावीण्यसाक्षात्क्रियाबाणाः पञ्च शिलीमुखस्य ललना चूडामणिः सा प्रिया ॥